जन्तुघ्नी, स्त्री, (जन्तुघ्न+टित्वात् ङीप्।) विड़ङ्गम्। इति राजनिर्घण्टः॥

जन्तुनाशनं, क्ली, (जन्तून् क्रिमीन् नाशयतीति। नश+णिच्+ल्युः। यद्वा, जन्तूनां नाशनं विनाशो यस्मादिति।) हिङ्गु। इति राजनिर्घण्टः॥

जन्तुपादपः, पुं, (जन्तुप्रधानः पादपः।) कोषाम्रवृक्षः। इति राजनिर्घण्टः॥

जन्तुफलः, पुं, (जन्तवः कीटाः फले यस्य।) उडुम्बरः। इत्यमरः। २।४।२२॥ (पर्य्यायोऽस्य यथा,—

"उडुम्बरो जन्तुफलो यज्ञाङ्गो हेमदुग्धकः॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे॥)

जन्तुमारी, स्त्री, (जन्तून् क्रिमीन् मारयतीति। जन्तु+मृ+णिच्+"कर्म्मण्यण्।" ३।२।१। इत्यण्। ततो ङीप्।) निम्बूकः। इति राजनिर्घण्टः॥

जन्तुला, स्त्री, (जन्तून् कीटान् लाति आददातीति। ला+कः।) काशतृणम्। इति त्रिकाण्डशेषः॥

जन्तुहन्त्री, स्त्री, (हन्तीति। हन्+तृच् स्त्रियां ङीप्। ततो जन्तूनां हन्त्री नाशिका।) विड़ङ्गम्। इति राजनिर्घण्टः॥

जन्म, [न्] क्ली, (जायते इति। जन+"सर्व्वधातुभ्यो मनिन्।" उणां। ४।१४४। इति मनिन्।) उत्पत्तिः। आद्यक्षणसम्बन्धः। इति तिथितत्त्वेऽमावस्याप्रकरणे व्याख्यातम्॥ तथा च। "अध्वस्तक्षणयोगस्य क्षणयोगो जनिर्म्मता।" इति सामान्यलक्षणायां शिरोमणिधृतोदयनाचार्य्यकारिका॥ तत्पर्य्यायः। जनुः २ जननम् ३ जनिः ४ उद्भवः ५। इत्यमरः। १।४।३०॥ जन्मम् ६ जनी ७। इति भरतः॥ प्रभवः ८ भावः ९ भवः १० सम्भवः ११ जनूः १२ प्रजननम् १३। इति शब्दरत्नावली॥ जातिः १४। इति जटाधरः॥ तच्च शुभाशुभकर्म्मणा भवति। यथा, ब्रह्मवैवर्त्ते प्रकृतिखण्डे।

"शुभानामशुभानाञ्च कर्म्मणा जन्म जायते।
पुण्यक्षेत्रे च सर्व्वत्र नान्यत्र भुञ्जते जनाः॥"*॥

तस्य क्रमो यथा,—

"ऋतौ विकाशि भवति योनिः कमलवत् सदा।
गर्भाशयस्ततः शुक्रं धत्ते रक्तसमन्वितः॥
अन्यत्र काले मुकुला योनिर्भवति योषिताम्।
स्वल्पं शुक्रमतो योनौ नैति गर्भाशयं शनैः॥
ऋतावपि च योनिश्चेद्वातपित्तकफावृता।
भवेत्तदा विशेषत्वं नैव तस्यां प्रजायते॥
ऋतुकाले यदा शुक्रं निर्दोषं योनिसंस्थितम्।
तदा तद्वायुना स्पृष्टं स्त्रीरक्तेनैकतां व्रजेत्॥
निषेकं मानवं स्त्रीणां वीजं प्राप्तं रजस्यथ।
सुक्तमात्रोऽपि नरकात् स्वर्गाद्वापि प्रपद्यते॥
विसर्गकाले शुक्रस्य जीवः करणसंवृतः।
इत्वा प्रविशते योनिं कर्म्मभिः स्वैर्नियोजितः॥
तच्छुक्ररक्तमेकस्थमेकाहात् कललं भवेत्।
पञ्चरात्रेण कललं बुद्बुदाकारतां व्रजेत्॥
बुद्बुदः सप्तरात्रेण मांसपेशी भवेत्ततः।
द्विसप्ताहाद्भवेत् पेशी रक्तमांसाचिता दृढा॥
वीजस्येवाङ्कुराः पेश्याः पञ्चविंशतिरात्रतः।
भवन्ति मासमात्रेण पञ्चधा जायते पुनः॥
ग्रीवा शिरश्च कण्ठश्च पृष्ठवंशस्तथोदरम्।
पाणिपादं तथा पार्श्वं कटिमात्रं तथैव च॥
मासद्वयेन सर्व्वाणि क्रमशः सम्भवन्ति हि।
त्रिभिर्म्मासैः प्रजायन्ते सर्व्वाङ्गाङ्कुरसन्धयः॥
मासैश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम्।
स्थैर्य्यं चतुर्थे चाङ्गानां पञ्चमे शोणितोद्भवः॥
मुखं नासा च कर्णौ च जायन्ते मासि पञ्चमे।
षष्ठे बलस्य वर्णस्य नखलोम्नाञ्च सम्भवः॥
दन्तपंक्तिस्तथा गुह्यं जायन्ते च नखाः पुनः।
कर्णयोश्च भवेच्छिद्रं षण्मासाभ्यन्तरेण च॥
पायुर्म्मेढ्रमुपस्थञ्च नाभिश्चैवोपजायते।
सन्धयो ये च गात्रेषु जायन्ते मासि सप्तमे॥
मनस्तु चेतनायुक्तो नाड़ीस्नायुसिरास्ततः।
सप्तमे चाष्टमे चैव त्वङ्मांसस्मृतिमानपि॥
अङ्गप्रत्यङ्गसम्पूर्णः शिरःकेशसमन्वितः।
विभक्तावयवः स्पष्टः पुनर्म्मासाष्टमेन च॥
नवमे दशमे मासि प्रबलैः सूतिमारुतैः।
निःसार्य्यते वाण इव जन्तुश्छिद्रेण सज्वरः॥
मनसश्चञ्चलत्वेन यदा गर्भस्थितिर्भवेत्।
तदा विकृतिरूपेण पापात्मा हि प्रजायते॥
पुटद्वयं समासाद्य यदा वहति मारुतः।
तदा प्रसूते पापिष्ठान् पक्षान् कर्म्मवहिष्कृतान्॥
मातृरक्तोत्तरा नारी पितुः शुक्रोत्तरो नरः।
उभयोर्वीजसामान्ये जायते वै नपुंसकम्॥"

अन्यच्च।

"विषमायां तिथौ क्षिप्रं कुर्य्याद्वीजन्तु कन्यकाम्।
समायां पुरुषं नूनं केचिदाहुर्म्मनीषिणः॥
वामाङ्गेन भवेन्नारी दक्षिणेन पुमान् भवेत्।
रक्ताधिक्ये मातृरूपं रेतोऽधिक्ये तु पैतृकम्॥
शुक्रशोणितसङ्घाते वायुना च द्विधा कृते।
यमौ स्यातां त्रिधा चेति चतुर्द्धा बहुधापि वा॥
ततो हीनाधिकखञ्जकुब्जवामनकादयः।
जायन्ते सर्पकुष्माण्डा विकृतान्याश्च योनयः॥"

तथा च सारकलिकायाम्।

"गर्भात् कोटिगुणं दुःखं योनियन्त्रनिपीड़ने।
संमूर्च्छा तस्य जठराज्जायमानस्य देहिनः॥
जायमानः पुरीषासृङ्मूत्रशुक्राविलाननः।
प्राजापत्येन वातेन पीड्यमानास्थिबन्धनः॥
अधोमुखो वै क्रियते प्रबलैः सूतिमारुतैः।
क्लेशान्निष्क्रान्तिमायाति जठरान्मातुरातुरः॥
ततस्तं वैष्णवी माया समास्कन्दति मोहिनी।
तया विमोहितात्मासौ ज्ञानभ्रंशमवाप्नुयात्॥
स्पृष्टमात्रस्य घोरश्च ज्वरः समुपजायते।
तेन ज्वरेण महता महामोहः प्रजायते॥
कण्टकैरिव भिन्नाङ्गः क्रकचैरिव दारितः।
पूतिव्रणान्निपतितो धरण्यां क्रिमिको यथा॥
त्वङ्बुभुक्षापरीताङ्गः क्वचित्तिष्ठति वा रटन्।
विण्मूत्रभक्षणाद्यश्च गतज्ञानः समाचरेत्॥
कण्डूयनेऽपि चाशक्तः परिवर्त्तेऽप्यनीश्वरः।
स्नानपानादिकाहारमप्याप्नोति परेच्छया॥
अशुचिः संस्तरे सुप्तः कीटदंशादिभिस्तथा।
भक्ष्यमाणोऽपि नैवैषां समर्थो विनिवारणे॥
केन बन्धनबद्धोऽहं कारणं किमकारणम्।
किं कार्य्यं किमकार्य्यं वा किं वाच्यं किञ्च नोच्यते॥
कोऽधर्म्मः कश्च वै धर्म्मः कस्मिन् वा वर्त्तते कथम्।
किं कर्त्तव्यमकर्त्तव्यं किं वा किं गुणदोषवत्॥
संमूढस्य स्मृतिभ्रंशः शीघ्रं संजायते पुनः।
रतिः संजायते तूर्णं जन्तोस्तत्रैव जन्मनि॥
रक्तो मूढश्च लोकोऽयमकार्य्ये सम्प्रवर्त्तते।
देही देहं परित्यज्य नेन्द्रस्थानमपीच्छति॥
तस्मात् कीटोऽपि जन्तूनां सुमूढो जायते भृशम्।
न चात्मानं विजानाति न परं न च दैवतम्॥
न शृणोति परं श्रेयः सति चक्षुषि नेक्षते।
बुद्धौ सत्यां न जानाति बुध्यमानो बुधैरपि॥
संसारे क्लिश्यते तेन रागलोभवशानुगः॥"

इति सुखबोधः॥

जन्मं, क्ली, (जायते इति। जन+बाहुलकात् मन्।) उत्पत्तिः। "अनन्तरं नाम्नीति मप्रत्यये जन्म मदन्तञ्च। जन्ममदन्तमपीत्युणादाविति मुकुटः। जन्मे पञ्चनवस्थिते कलहरिपुभयमिति ज्योतिषे।" इत्यमरटीकायां भरतः॥

जन्मकीलः, पुं, (जन्मनः कील इव। विष्णुसेवनेन हि जन्माभावात् तथात्वम्।) विष्णुः। इति त्रिकाण्डशेषः॥

जन्मदः, पुं, (जन्म ददातीति। जन्म+दा+"आतोऽनुपसर्गे कः।" ३।२।३। इति कः।) पिता। इति शब्दरत्नावली॥

जन्मवर्त्म, [न्] क्ली, (जन्मन उत्पत्तेर्वर्त्म पन्थाः।) योनिः। इति त्रिकाण्डशेषः॥

जन्मान्तरं, क्ली, (जन्मनः अन्तरम्।) परलोकः। इति भरतः॥ तत्पर्य्यायः। भावान्तरम् २ प्रेत्य ३ अमुत्र ४। इत्यमरः॥ (यथा, महाभारते। ३ पर्व्वणि।

"नूनं जन्मान्तरकृतं पापमाचरितं महत्॥"

अन्यत् जन्म। मयूरव्यंसकादिवत् समासः। पुनर्जन्म। यथा, पञ्चतन्त्रे। २। १८५।

"वरं प्राणपरित्यागो न वियोगो भवादृशैः।
प्राणा जन्मान्तरे भूयो न भवन्ति भवद्विधाः॥")

जन्माष्टमी, स्त्री, (जन्मनः श्रीकृष्णोत्पत्तेरष्टमी तिथिः।) भाद्रकृष्णाष्टमी। सा च श्रीकृष्णस्य जन्मतिथिः। सा तु मुख्यचान्द्रेण श्रावणस्य कृष्णाष्टमी गौणचान्द्रेण भाद्रस्य। तत्र श्रीकृष्णस्य जन्मकालो यथा, ब्रह्मपुराणे।

"अथ भाद्रपदे मासि कृष्णाष्टम्यां कलौ युगे।
अष्टाविंशतिमे जातः कृष्णोऽसौ देवकीसुतः॥"

विष्णुपुराणे महामायां प्रति भगवद्वाक्यम्।

"प्रावृट्काले च नभसि कृष्णाष्टम्यां महानिशि।
उत्पत्स्यामि नवम्यान्तु प्रसूतिं त्वमवाप्स्यसि॥
श्रावणे वा नभस्ये वा रोहिणीसहिताष्टमी।
यदा कृष्णे नरैर्लब्धा सा जयन्ती प्रकीर्त्तिता॥"